## Vishṇu Sahasranāma Stōtram

*As per Challakere Brothers' chanting*

1. ॐ – विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥
ॐ – viśh’vaṁ’ viṣh’ṇur’vaṣhaṭ’kārō bhūtabhav’yabhavat’prabhuḥu ।
bhūtakṛd’bhūtabhṛd’bhāvō bhūtāt’mā bhūtabhāvanaḥa ॥

2. पूतात्मा परमात्मा च मुक्तानाम् परमा गतिः ।
अव्ययः पुरुषस् साक्षी क्षेत्रज्ञोऽक्षर , एव च ॥
pūtāt’mā paramāt’mā cha muk’tānām’ paramā gatiḥi ।
av’yaya[fp]’ puruṣhas’ sāk’ṣhīk’ kṣhēt’raj’ñō (a)k’ṣhara , ēva cha ॥

3. योगो योगविदान् नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुश् श्रीमान् केशवः पुरुषोत्तमः ॥
yōgō yōgavidān’ nētāp’ pradhānapuruṣhēśh’varaḥa ।
nārasiṁ’havapuśh’ śhrīmān’ kēśhava[fp]’ puruṣhōt’tamaḥa ॥

4. सर्वश् शर्वश् शिवस् स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥
sar’vaśh’ śhar’vaśh’ śhivas’ sthāṇur’bhūtādir’nidhirav’yayaḥa ।
sam’bhavō bhāvanō bhar’tāp’ prabhava[fp]’ prabhurīśh’varaḥa ॥

5. स्वयंभूः शंभुरादित्यः पुष्कराक्ष्o महास्वनः ।
अनादिनिधन्o धाता विधाता धातुरुत्तमः ॥
svayam’bhūśh’ śham’bhurādit’ya[fp]’ puṣh’karāk’ṣhō mahās’vanaḥa ।
anādinidhanō dhātā vidhātā dhāturut’tamaḥa ॥

6. अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठस् स्थविरो ध्रुवः ॥
ap’ramēyō hṛṣhīkēśha[fp]’ pad’manābhō (a)marap’rabhuḥu ।
viśh’vakar’mā manus’tvaṣh’ṭās’ sthaviṣh’ṭhas’ sthavirōd’ dhruvaḥa ॥

7. अग्राह्यश् शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रम् मङ्गलम् परम् ॥
ag’rāh’yaśh’ śhāśh’vata[hk]’ kṛṣh’ṇō lōhitāk’ṣha[fp]’ pratar’danaḥa ।
prabhūtas’trikakub’dhāma pavit’ram’ maṅ’galam’ param ॥

8. ईशानः प्राणदः प्राणो ज्येष्ठश् श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥
īśhāna[fp]’ prāṇada[fp]’ prāṇōj’ jyēṣh’ṭhaśh’ śhrēṣh’ṭha[fp]’ prajāpatiḥi |
hiraṇ’yagar’bhō bhūgar’bhō mādhavō madhusūdanaḥa ||

9. ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥
īśh’varō vik’ramī dhan’vī mēdhāvī vik’rama[hk]’ kramaḥa |
anut’tamō durādhar’ṣha[hk]’ kṛtaj’ña[hk]’ kṛtirāt’mavā-ne ||

10. सुरेशश् शरणं शर्म विश्वरेताः प्रजाभवः ।
अहस् संवत्सरो व्यालः प्रत्ययस् सर्वदर्शनः ॥
surēśhaśh’ śharaṇaṁ’ śhar’ma viśh’varētā[fp]’ prajābhavaḥa |
ahas’ saṁ’vat’sarōv’ vyāla[fp]’ prat’yayas’ sar’vadar’śhanaḥa ||

11. अजस् सर्वेश्वरस् सिद्धस् सिद्धिस् सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥
ajas’ sar’vēśh’varas’ sid’dhas’ sid’dhis’ sar’vādirach’yutaḥa |
vṛṣhākapiramēyāt’mā sar’vayōgavinis’ sṛtaḥa ||

12. वसुर्वसुमनास् सत्यस् समात्माऽसम्मितस् समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥
vasur’vasumanās’ sat’yas’ samāt’mā (a)sam’mitas’ samaḥa |
amōgha[fp]’ puṇ’ḍarīkāk’ṣhō vṛṣhakar’mā vṛṣhākṛtiḥi ||

13. रुद्रो बहुशिरा बभ्रुर्विश्वयोनिश् शुचिश्रवाः ।
अमृतश् शाश्वतस्थाणुर्वरारोहो महातपाः ॥
rud’rō bahuśhirā babh’rur’viśh’vayōniśh’ śhuchiśh’ravā-ḥa |
amṛtaśh’ śhāśh’vatas’thāṇur’varārōhō mahātapā-ḥa ||

14. सर्वगस् सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥
sar’vagas’ sar’vavid’bhānur’viṣh’vak’sēnō janār’danaḥa |
vēdō vēdavidav’yaṅ’gō vēdāṅ’gō vēdavit’ kaviḥi ||



www.saiveda.net

15. लोकाध्यक्षस् सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥
lōkādh'yak'ṣhas' surādh'yak'ṣhō dhar'mādh'yak'ṣha[hk]' kṛtākṛtaḥa |
chaturāt'mā chatur'vyūhaśh'chatur'daṁṣh'ṭraśh'chatur'bhujaḥa ||

16. भ्राजिष्णुर्भोजनम् भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥
bhrājiṣh'ṇur'bhōjanam' bhōk'tā sahiṣh'ṇur'jagadādijaḥa |
anaghō vijayō jētā viśh'vayōni[fp]' punar'vasuḥu ||

17. उपेन्द्रो वामनः प्रांशुरमोघश् शुचिरूर्जितः ।
अतीन्द्रस् सङ्ग्रहस् सर्गो धृतात्मा नियमो यमः ॥
upēn'drō vāmana[fp]' prāṁ'śhuramōghaśh' śhuchirūr'jitaḥa |
atīn'dras' saṅ'grahas' sar'gō dhṛtāt'mā niyamō yamaḥa ||

18. वेद्यो वैद्यस् सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥
vēd'yō vaid'yas' sadāyōgī vīrahā mādhavō madhuḥu |
atīn'driyō mahāmāyō mahōt'sāhō mahābalaḥa ||

19. महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुश् श्रीमानमेयात्मा महाद्रिधृक् ॥
mahābud'dhir'mahāvīr'yō mahāśhak'tir'mahād'yutiḥi |
anir'dēśh'yavapuśh' śhrīmānamēyāt'mā mahād'ridhṛke ||

20. महेष्वासो महीभर्ता श्रीनिवासस् सताङ् गतिः ।
अनिरुद्धस् सुरानन्दो गोविन्दो गोविदाम् पतिः ॥
mahēṣh'vāsō mahībhar'tāśh' śhrīnivāsas' satāṅ' gatiḥi |
anirud'dhas' surānan'dō gōvin'dō gōvidām' patiḥi ||

21. मरीचिर्दमनो हंसस् सुपर्णो भुजगोत्तमः ।
हिरण्यनाभस् सुतपाः पद्मनाभः प्रजापतिः ॥
marīchir'damanō haṁ'sas' supar'ṇō bhujagōt'tamaḥa |
hiraṇ'yanābhas' sutapā[fp]' pad'manābha[fp]' prajāpatiḥi ||

22. अमृत्युस् सर्वदृक् सिंहस् सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणश् शास्ता विश्रुतात्मा सुरारिहा ॥
amṛt'yus' sar'vadṛk' siṁ'has' san'dhātā san'dhimān' sthiraḥa ।
ajō dur'mar'ṣhaṇaśh' śhās'tā viśh'rutāt'mā surāriha ॥

23. गुरुर्गुरुतमो धाम सत्यस् सत्यपराक्रमः ।
निमिषोऽनिमिषस् स्रग्वी वाचस्पतिरुदारधीः ॥
gurur'gurutamō dhāma sat'yas' sat'yaparāk'ramaḥa ।
nimiṣhō (a)nimiṣhas' srag'vī vāchas'patirudāradhī-ḥi ॥

24. अग्रणीर्ग्रामणीश् श्रीमान् न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षस् सहस्रपात् ॥
ag'raṇīr'grāmaṇīśh' śhrīmān' nyāyō nētā samīraṇaḥa ।
sahas'ramūr'dhā viśh'vāt'mā sahas'rāk'ṣhas' sahas'rapā-te ॥

25. आवर्तनो निवृत्तात्मा संवृतस् सम्प्रमर्दनः ।
अहस् संवर्तको वन्हिरनिलो धरणीधरः ॥
āvar'tanō nivṛt'tāt'mā saṁ'vṛtas' sam'pramar'danaḥa ।
ahas' saṁ'var'takō van'hiranilō dharaṇīdharaḥa ॥

26. सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतस् साधुर्जन्हुर्नारायणो नरः ॥
sup'rasāda[fp]' prasan'nāt'mā viśh'vadhṛg'viśh'vabhug'vibhuḥu ।
sat'kar'tā sat'kṛtas' sādhur'jan'hur'nārāyaṇō naraḥa ॥

27. असंख्येयोऽप्रमेयात्मा विशिष्टश् शिष्टकृच्छुचिः ।
सिद्धार्थस् सिद्धसङ्कल्पस् सिद्धिदस् सिद्धिसाधनः ॥
asaṅ'khyēyō (a)p'ramēyāt'mā viśhiṣh'ṭaśh' śhiṣh'ṭakṛt'chhuchiḥi ।
sid'dhār'thas' sid'dhasaṅ'kal'pas' sid'dhidas' sid'dhisādhanaḥa ॥

28. वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तश् श्रुतिसागरः ॥
vṛṣhāhī vṛṣhabhō viṣh'ṇur'vṛṣhapar'vā vṛṣhōdaraḥa ।
var'dhanō var'dhamānaśh'cha vivik'taśh' śhrutisāgaraḥa ॥

www.sanskrit.vedanet

29. सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपश् शिपिविष्टः प्रकाशनः ॥
subhujō dur'dharō vāg'mī mahēn'drō vasudō vasuḥu |
naikarūpō bṛhad'rūpaśh' śhipiviṣh'ṭa[fp]' prakāśhanaḥa ||

30. ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धस् स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥
ōjas'tējōd'yutidhara[fp]' prakāśhāt'māp' pratāpanaḥa |
ṛd'dhas' spaṣh'ṭāk'ṣharō man'traśh'chan'drāṁ'śhur'bhās'karad'yutiḥi ||

31. अमृतांशूद्भवो भानुश् शशबिन्दुस् सुरेश्वरः ।
औषधञ् जगतस् सेतुस् सत्यधर्मपराक्रमः ॥
amṛtāṁ'śhūd'bhavō bhānuśh' śhaśhabin'dus' surēśh'varaḥa |
auṣhadhañ' jagatas' sētus' sat'yadhar'maparāk'ramaḥa ||

32. भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥
bhūtabhav'yabhavan'nātha[fp]' pavana[fp]' pāvanō (a)nalaḥa |
kāmahā kāmakṛt'kān'ta[hk]' kāma[hk]' kāmap'rada[fp]' prabhuḥu ||

33. युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥
yugādikṛd'yugāvar'tō naikamāyō mahāśhanaḥa |
adṛśh'yōv' vyak'tarūpaśh'cha sahas'rajidanan'tajite ||

34. इष्टोऽविशिष्टश् शिष्टेष्टश् शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥
iṣh'ṭō (a)viśhiṣh'ṭaśh' śhiṣh'ṭēṣh'ṭaśh' śhikhaṇ'ḍī nahuṣhō vṛṣhaḥa |
krōdhahāk' krōdhakṛt'kar'tā viśh'vabāhur'mahīdharaḥa ||

35. अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपान्निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥
ach'yuta[fp]' prathita[fp]' prāṇa[fp]' prāṇadō vāsavānujaḥa |
apān'nidhiradhiṣh'ṭhānamap'ramat'ta[fp]' pratiṣh'ṭhitaḥa ||

www.saiveda.net

36. स्कन्दस् स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥
skan’das’ skan’dadharō dhur’yō varadō vāyuvāhanaḥa ।
vāsudēvō bṛhad’bhānurādidēva[fp]’ puran’daraḥa ॥

37. अशोकस्तारणस्तारश् शूरश् शौरिर्जनेश्वरः ।
अनुकूलश् शतावर्तः पद्मी पद्मनिभेक्षणः ॥
aśhōkas’tāraṇas’tāraśh’ śhūraśh’ śhaurir’janēśh’varaḥa ।
anukūlaśh’ śhatāvar’ta[fp]’ pad’mī pad’manibhēk’ṣhaṇaḥa ॥

38. पद्मनाभोऽरविन्दाक्षः पद्मगर्भश् शरीरभृत् ।
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥
pad’manābhō (a)ravin’dāk’ṣha[fp]’ pad’magar’bhaśh’ śharīrabhṛte ।
mahard’dhir’ṛd’dhō vṛd’dhāt’mā mahāk’ṣhō garuḍadh’vajaḥa ॥

39. अतुलश् शरभो भीमस् समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥
atulaśh’ śharabhō bhīmas’ samayaj’ñō havir’hariḥi ।
sar’valak’ṣhaṇalak’ṣhaṇ’yō lak’ṣhmīvān’ samitiñ’jayaḥa ॥

40. विक्षरो रोहितो मार्गो हेतुर्दामोदरस् सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥
vik’ṣharō rōhitō mār’gō hētur’dāmōdaras’ sahaḥa ।
mahīdharō mahābhāgō vēgavānamitāśhanaḥa ॥

41. उद्भवः क्षोभणो देवश् श्रीगर्भः परमेश्वरः ।
करणङ् कारणङ् कर्ता विकर्ता गहनो गुहः ॥
ud’bhavaḥa , kṣhōbhaṇō dēvaśh’ śhrīgar’bha[fp]’ paramēśh’varaḥa ।
karaṇaṅ’ kāraṇaṅ’ kar’tā vikar’tā gahanō guhaḥa ॥

42. व्यवसायो व्यवस्थानस् संस्थानस् स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टश् शुभेक्षणः ॥
vyavasāyōv’ vyavas’thānas’ saṁ’sthānas’ sthānadōd’ dhruvaḥa ।
parard’dhi[fp]’ paramas’paṣh’ṭas’tuṣh’ṭa[fp]’ puṣh’ṭaśh’ śhubhēk’ṣhaṇaḥa ॥

www.saiveda.net

43. रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरश् शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥
rāmō virāmō virajō mār'gō nēyō nayō (a)nayaḥa ।
vīraśh' śhak'timatāṁ' śhrēṣh'ṭhō dhar'mō dhar'mavidut'tamaḥa ॥

44. वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भश् शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥
vaikuṇ'ṭha[fp]' puruṣha[fp]' prāṇa[fp]' prāṇada[fp]' praṇava[fp]' pṛthuḥu ।
hiraṇ'yagar'bhaśh' śhat'rugh'nōv' vyāp'tō vāyuradhōk'ṣhajaḥa ॥

45. ऋतुस् सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रस् संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥
ṛtus' sudar'śhana[hk]' kāla[fp]' paramēṣh'ṭhī parig'rahaḥa ।
ug'ras' saṁ'vat'sarō dak'ṣhō viśh'rāmō viśh'vadak'ṣhiṇaḥa ॥

46. विस्तारस् स्थावरस्थाणुः प्रमाणम् बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥
vis'tāras' sthāvaras'thāṇu[fp]' pramāṇam' bījamav'yayam ।
ar'thō (a)nar'thō mahākōśhō mahābhōgō mahādhanaḥa ॥

47. अनिर्विण्णस् स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामस् समीहनः ॥
anir'viṇ'ṇas' sthaviṣh'ṭhō (a)bhūr'dhar'mayūpō mahāmakhaḥa ।
nak'ṣhat'ranēmir'nak'ṣhat'rīk' kṣhamaḥa , kṣhāmas' samīhanaḥa ॥

48. यज्ञ , इज्यो महेज्यश्च क्रतुस् सत्रं सताङ्गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥
yaj'ña , ij'yō mahēj'yaśh'chak' kratus' sat'raṁ' satāṅ' gatiḥi ।
sar'vadar'śhī vimuk'tāt'mā sar'vaj'ñōj' jñānamut'tamam ॥

49. सुव्रतस् सुमुखस् सूक्ष्मस् सुघोषस् सुखदस् सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥
suv'ratas' sumukhas' sūk'ṣhmas' sughōṣhas' sukhadas' suhṛte ।
manōharō jitak'rōdhō vīrabāhur'vidāraṇaḥa ॥

50. स्वापनस् स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥
svāpanas’ svavaśhōv’ vyāpī naikāt’mā naikakar’makṛte ।
vat’sarō vat’salō vat’sī rat’nagar’bhō dhanēśh’varaḥa ॥

51. धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥
dhar’magub’dhar’makṛd’dhar’mī sadasat’kṣharamak’ṣharam ।
avij’ñātā sahas’rāṁ’śhur’vidhātā kṛtalak’ṣhaṇaḥa ॥

52. गभस्तिनेमिस् सत्त्वस्थस् सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥
gabhas’tinēmis’ sat’tvas’thas’ siṁ’hō bhūtamahēśh’varaḥa ।
ādidēvō mahādēvō dēvēśhō dēvabhṛd’guruḥu ॥

53. उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥
ut’tarō gōpatir’gōp’tāj’ jñānagam’ya[fp]’ purātanaḥa ।
śharīrabhūtabhṛd’bhōk’tā kapīn’drō bhūridak’ṣhiṇaḥa ॥

54. सोमपोऽमृतपस् सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयस् सत्यसन्धो दाशार्हस् सात्वताम्पतिः ॥
sōmapō (a)mṛtapas’ sōma[fp]’ purujit’purusat’tamaḥa ।
vinayō jayas’ sat’yasan’dhō dāśhār’has’ sāt’vatām’patiḥi ॥

55. जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥
jīvō vinayitā sāk’ṣhī mukun’dō (a)mitavik’ramaḥa ।
am’bhōnidhiranan’tāt’mā mahōdadhiśhayō (a)n’takaḥa ॥

56. अजो महार्हस् स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दस् सत्यधर्मा त्रिविक्रमः ॥
ajō mahār’has’ svābhāv’yō jitāmit’ra[fp]’ pramōdanaḥa ।
ānan’dō nan’danō nan’das’ sat’yadhar’māt’ trivik’ramaḥa ॥

www.saiveda.net

57. महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥
mahar'ṣhi[hk]' kapilāchār'ya[hk]' kṛtaj'ñō mēdinīpatiḥi |
tripadas'tridaśhādh'yak'ṣhō mahāśhṛṅ'ga[hk]' kṛtān'takṛte ||

58. महावराहो गोविन्दस् सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥
mahāvarāhō gōvin'das' suṣhēṇa[hk]' kanakāṅ'gadī |
guh'yō gabhīrō gahanō gup'taśh'chak'ragadādharaḥa ||

59. वेधास् स्वाङ्गोऽजितः कृष्णो दृढस् सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥
vēdhās' svāṅ'gō (a)jita[hk]' kṛṣh'ṇō dṛḍhas' saṅ'kar'ṣhaṇō (a)ch'yutaḥa |
varuṇō vāruṇō vṛk'ṣha[fp]' puṣh'karāk'ṣhō mahāmanā-ḥa ||

60. भगवान् भगहाऽऽनन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यस् सहिष्णुर्गतिसत्तमः ॥
bhagavān' bhagahā (ā)nan'dī vanamālī halāyudhaḥa |
ādit'yōj' jyōtirādit'yas' sahiṣh'ṇur'gatisat'tamaḥa ||

61. सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥
sudhan'vā khaṇ'ḍaparaśhur'dāruṇōd' draviṇap'radaḥa |
divas'pṛk' sar'vadṛg'vyāsō vāchas'patirayōnijaḥa ||

62. त्रिसामा सामगस् साम निर्वाणम् भेषजम् भिषक् ।
सन्न्यासकृच्छमश् शान्तो निष्ठा शान्तिः परायणम् ॥
trisāmā sāmagas' sāma nir'vāṇam' bhēṣhajam' bhiṣhake |
san'nyāsakṛt'chhamaśh' śhān'tō niṣh'ṭhā śhān'ti[fp]' parāyaṇam ||

63. शुभाङ्गश् शान्तिदस् स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥
śhubhāṅ'gaśh' śhān'tidas' sraṣh'ṭā kumuda[hk]' kuvalēśhayaḥa |
gōhitō gōpatir'gōp'tā vṛṣhabhāk'ṣhō vṛṣhap'riyaḥa ||

www.saiveda.net

64. अनिवर्ती निवृत्तात्मा सङ्क्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाश्श्रीवासश्श्रीपतिश्श्रीमतांवरः ॥
anivar'tī nivṛt'tāt'mā saṅ'kṣhēp'tāk' kṣhēmakṛt'chhivaḥa ।
śhrīvat'savak'ṣhāśh' śhrīvāsaśh' śhrīpatiśh' śhrīmatāṁ'varaḥa ॥

65. श्रीदश्श्रीशश्श्रीनिवासश्श्रीनिधिश्श्रीविभावनः ।
श्रीधरश्श्रीकरश्श्रेयश्श्रीमाँल्लोकत्रयाश्रयः ॥
śhrīdaśh' śhrīśhaśh' śhrīnivāsaśh' śhrīnidhiśh' śhrīvibhāvanaḥa ।
śhrīdharaśh' śhrīkaraśh' śhrēyaśh' śhrīmāṁl'lōkat'rayāśh'rayaḥa ॥

66. स्वक्षस्स्वङ्गश्शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥
svak'ṣhas' svaṅ'gaśh' śhatānan'dō nan'dir'jyōtir'gaṇēśh'varaḥa ।
vijitāt'mā (a)vidhēyāt'mā sat'kīr'tiśh'chhin'nasaṁ'śhayaḥa ॥

67. उदीर्णस्सर्वतश्चक्षुरनीशश्शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकश्शोकनाशनः ॥
udīr'ṇas' sar'vataśh'chak'ṣhuranīśhaśh' śhāśh'vatas'thiraḥa ।
bhūśhayō bhūṣhaṇō bhūtir'viśhōkaśh' śhōkanāśhanaḥa ॥

68. अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥
ar'chiṣh'mānar'chita[hk]' kum'bhō viśhud'dhāt'mā viśhōdhanaḥa ।
anirud'dhō (a)p'ratiratha[fp]' prad'yum'nō (a)mitavik'ramaḥa ॥

69. कालनेमिनिहा वीरश्शौरिश्शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥
kālanēminihā vīraśh' śhauriśh' śhūrajanēśh'varaḥa ।
trilōkāt'māt' trilōkēśha[hk]' kēśhava[hk]' kēśhihā harihi ॥

70. कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥
kāmadēva[hk]' kāmapāla[hk]' kāmī kān'ta[hk]' kṛtāgamaḥa ।
anir'dēśh'yavapur'viṣh'ṇur'vīrō (a)nan'tō dhanañ'jayaḥa ॥

71. ब्रम्हण्यो ब्रम्हकृद् ब्रम्हा ब्रम्ह ब्रम्हविवर्धनः ।
ब्रम्हविद् ब्राम्हणो ब्रम्ही ब्रम्हज्ञो ब्राम्हणप्रियः ॥
bram’haṇ’yōb’ bram’hakṛd’ bram’hāb’ bram’hab’ bram’havivar’dhanaḥa ǀ
bram’havid’ brām’haṇōb’ bram’hīb’ bram’haj’ñōb’ brām’haṇap’riyaḥa ǁ

72. महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥
mahāk’ramō mahākar’mā mahātējā mahōragaḥa ǀ
mahāk’ratur’mahāyaj’vā mahāyaj’ñō mahāhaviḥi ǁ

73. स्तव्यस् स्तवप्रियस् स्तोत्रं स्तुतिस् स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥
stav’yas’ stavap’riyas’ stōt’raṁ’ stutis’ stōtā raṇap’riyaḥa ǀ
pūr’ṇa[fp]’ pūrayitā puṇ’ya[fp]’ puṇ’yakīr’tiranāmayaḥa ǁ

74. मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥
manōjavas’tīr’thakarō vasurētā vasup’radaḥa ǀ
vasup’radō vāsudēvō vasur’vasumanā haviḥi ǁ

75. सद्गतिस् सत्कृतिस् सत्ता सद्भूतिस् सत्परायणः ।
शूरसेनो यदुश्रेष्ठस् सन्निवासस् सुयामुनः ॥
sad’gatis’ sat’kṛtis’ sat’tā sad’bhūtis’ sat’parāyaṇaḥa ǀ
śhūrasēnō yaduśh’rēṣh’ṭhas’ san’nivāsas’ suyāmunaḥa ǁ

76. भूतावासो वासुदेवस् सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥
bhūtāvāsō vāsudēvas’ sar’vāsunilayō (a)nalaḥa ǀ
dar’pahā dar’padō dṛp’tō dur’dharō (a)thāparājitaḥa ǁ

77. विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तश् शतमूर्तिश् शताननः ॥
viśh’vamūr’tir’mahāmūr’tir’dīp’tamūr’tiramūr’timā-ne ǀ
anēkamūr’tirav’yak’taśh’ śhatamūr’tiśh’ śhatānanaḥa ǁ

www.saiveda.net

78. एको नैकस् सवः कः किञ् यत् तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥
ēkō naikas' sava[hk]' ka[hk]' kiñ' yat' tat'padamanut'tamam ।
lōkaban'dhur'lōkanāthō mādhavō bhak'tavat'salaḥa ॥

79. सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमश् शून्यो घृताशीरचलश्चलः ॥
suvar'ṇavar'ṇō hēmāṅ'gō varāṅ'gaśh'chan'danāṅ'gadī ।
vīrahā viṣhamaśh' śhūn'yō ghṛtāśhīrachalaśh'chalaḥa ॥

80. अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यस् सत्यमेधा धराधरः ॥
amānī mānadō mān'yō lōkas'vāmīt' trilōkadhṛke ।
sumēdhā mēdhajō dhan'yas' sat'yamēdhā dharādharaḥa ॥

81. तेजोवृषो द्युतिधरस् सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥
tējōvṛṣhōd' dyutidharas' sar'vaśhas'trabhṛtāṁ' varaḥa ।
prag'rahō nig'rahōv' vyag'rō naikaśhṛṅ'gō gadāg'rajaḥa ॥

82. चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥
chatur'mūr'tiśh'chatur'bāhuśh'chatur'vyūhaśh'chatur'gatiḥi ।
chaturāt'mā chatur'bhāvaśh'chatur'vēdavidēkapā-te ॥

83. समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥
samāvar'tō (a)nivṛt'tāt'mā dur'jayō duratik'ramaḥa ।
dur'labhō dur'gamō dur'gō durāvāsō durārihā ॥

84. शुभाङ्गो लोकसारङ्गस् सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥
śhubhāṅ'gō lōkasāraṅ'gas' sutan'tus'tan'tuvar'dhanaḥa ।
in'drakar'mā mahākar'mā kṛtakar'mā kṛtāgamaḥa ॥



www.sanskritweda.net

85. उद्भवस् सुन्दरस् सुन्दो रत्ननाभस् सुलोचनः ।
अर्को वाजसनश् शृङ्गी जयन्तस् सर्वविज्जयी ॥
ud’bhavas’ sun’daras’ sun’dō rat’nanābhas’ sulōchanaha ।
ar’kō vājasanaśh’ śhṛṅ’gī jayan’tas’ sar’vavij’jayī ॥

86. सुवर्णबिन्दुरक्षोभ्यस् सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥
suvar’ṇabin’durak’ṣhōbh’yas’ sar’vavāgīśh’varēśh’varaha ।
mahāh’radō mahāgar’tō mahābhūtō mahānidhihi ॥

87. कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताम्शोऽमृतवपुस् सर्वज्ञस् सर्वतोमुखः ॥
kumuda[hk]’ kun’dara[hk]’ kun’da[fp]’ par’jan’ya[fp]’ pāvanō (a)nilaha ।
amṛtām’śhō (a)mṛtavapus’ sar’vaj’ñas’ sar’vatōmukhaha ॥

88. सुलभस् सुव्रतस् सिद्धश् शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोऽदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥
sulabhas’ suv’ratas’ sid’dhaśh’ śhat’rujit’chhat’rutāpanaha ।
nyag’rōdhō (a)dum’barō (a)śh’vat’thaśh’chāṇūrān’dhraniṣhūdanaha ॥

89. सहस्रार्चिस् सप्तजिह्वस् सप्तैधास् सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥
sahas’rār’chis’ sap’tajih’vas’ sap’taidhās’ sap’tavāhanaha ।
amūr’tiranaghō (a)chin’tyō bhayakṛd’bhayanāśhanaha ॥

90. अणुर्बृहत्कृशस् स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतस् स्वधृतस् स्वास्यः प्राग्वंशो वंशवर्धनः ॥
aṇur’bṛhat’kṛśhas’ sthūlō guṇabhṛn’nir’guṇō mahā-ne ।
adhṛtas’ svadhṛtas’ svās’ya[fp]’ prāg’vaṁ’śhō vaṁ’śhavar’dhanaha ॥

91. भारभृत् कथितो योगी योगीशस् सर्वकामदः ।
आश्रमश् श्रमणḥ क्षामस् सुपर्णो वायुवाहनः ॥
bhārabhṛt’ kathitō yōgī yōgīśhas’ sar’vakāmadaha ।
āśh’ramaśh’ śhramaṇaha , kṣhāmas’ supar’ṇō vāyuvāhanaha ॥

www.saiveda.net

92. धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितस् सर्वसहो नियन्ताऽनियमोऽयमः ॥
dhanur’dharō dhanur’vēdō daṇ’ḍō damayitā damaḥa ।
aparājitas’ sar’vasahō niyan’tā (a)niyamō (a)yamaḥa ॥

93. सत्त्ववान् सात्त्विकस् सत्यस् सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥
sat’tvavān’ sāt’tvikas’ sat’yas’ sat’yadhar’maparāyaṇaḥa ।
abhip’rāya[fp]’ priyār’hō (a)r’ha[fp]’ priyakṛt’ prītivar’dhanaḥa ॥

94. विहायसगतिर्ज्योतिस् सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनस् सूर्यस् सविता रविलोचनः ॥
vihāyasagatir’jyōtis’ suruchir’hutabhug’vibhuḥu ।
ravir’virōchanas’ sūr’yas’ savitā ravilōchanaḥa ॥

95. अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णस् सदामर्षी लोकाधिष्ठानमद्भुतः ॥
anan’tō hutabhug’bhōk’tā sukhadō naikajō (a)g’rajaḥa ।
anir’viṇ’ṇas’ sadāmar’ṣhī lōkādhiṣh’ṭhānamad’bhutaḥa ॥

96. सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदस् स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥
sanāt’sanātanatama[hk]’ kapila[hk]’ kapirav’yayaḥa ।
svas’tidas’ svas’tikṛt’svas’tis’ svas’tibhuk’svas’tidak’ṣhiṇaḥa ॥

97. अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगश् शब्दसहश् शिशिरश् शर्वरीकरः ॥
araud’ra[hk]’ kuṇ’ḍalī chak’rī vik’ram’yūr’jitaśhāsanaḥa ।
śhab’dātigaśh’ śhab’dasahaśh’ śhiśhiraśh’ śhar’varīkaraḥa ॥

98. अक्रूरः पेशलो दक्षो दक्षिणḥ क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥
ak’rūra[fp]’ pēśhalō dak’ṣhō dak’ṣhiṇaḥa , kṣhamiṇāṁ’varaḥa ।
vid’vat’tamō vītabhaya[fp]’ puṇ’yaśh’ravaṇakīr’tanaḥa ॥

www.saiveda.net

99. उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणस् सन्तो जीवनः पर्यवस्थितः ॥
ut'tāraṇō duṣh'kṛtihā puṇ'yō dus' svap'nanāśhanaha ।
vīrahā rak'ṣhaṇas' san'tō jīvana[fp]' par'yavas'thitaha ॥

100. अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥
anan'tarūpō (a)nan'taśh'rīr'jitaman'yur'bhayāpahaha ।
chaturaśh'rō gabhīrāt'mā vidiśhōv' vyādiśhō diśhaha ॥

101. अनादिर्भूर्भुवो लक्ष्मीस् सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥
anādir'bhūr'bhuvō lak'ṣhmīs' suvīrō ruchirāṅ'gadaha ।
jananō janajan'mādir'bhīmō bhīmaparāk'ramaha ॥

102. आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगस् सत्पथाचारः प्राणदः प्रणवः पणः ॥
ādhāranilayō (a)dhātā puṣh'pahāsa[fp]' prajāgaraha ।
ūr'dhvagas' sat'pathāchāra[fp]' prāṇada[fp]' praṇava[fp]' paṇaha ॥

103. प्रमाणम् प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वन् तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥
pramāṇam' prāṇanilaya[fp]' prāṇabhṛt'prāṇajīvanaha ।
tat'tvan' tat'tvavidēkāt'mā jan'mamṛt'yujarātigaha ॥

104. भूर्भुवःस्वस्तरुस्तारस् सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥
bhūr'bhuvas' svas'tarus'tāras' savitāp' prapitāmahaha ।
yaj'ñō yaj'ñapatir'yaj'vā yaj'ñāṅ'gō yaj'ñavāhanaha ॥

105. यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः ।
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद , एव च ॥
yaj'ñabhṛd' yaj'ñakṛd' yaj'ñī yaj'ñabhug' yaj'ñasādhanaha ।
yaj'ñān'takṛd' yaj'ñaguh'yaman'naman'nāda , ēva cha ॥

106. आत्मयोनिस् स्वयञ्जातो वैखानस् सामगायनः ।
देवकीनन्दनस् स्रष्टा क्षितीशः पापनाशनः ॥
āt’mayōnis’ svayañ’jātō vaikhānas’ sāmagāyanaḥa ।
dēvakīnan’danas’ sraṣh’ṭāk’ kṣhitīśha[fp]’ pāpanāśhanaḥa ॥

107. शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यस् सर्वप्रहरणायुधः ॥
śhaṅ’khabhṛn’nan’dakī chak’rī śhārṅ’gadhan’vā gadādharaḥa ।
rathāṅ’gapāṇirak’ṣhōbh’yas’ sar’vap’raharaṇāyudhaḥa ॥

108. सर्वप्रहरणायुध , ओं नम , इति ।
वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।
श्रीमान् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥
sar’vap’raharaṇāyudha , ōn’ nama , iti ।
vanamālī gadī śhārṅ’gī śhaṅ’khī chak’rī cha nan’dakī ।
śhrīmān’ nārāyaṇō viṣh’ṇur’vāsudēvō (a)bhirak’ṣhatu ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.sanskritveda.net